# shivajayavAdastotram

# शिवजयवादस्तोत्रम्

## Document Information

Text title : shivajayavAdastotram

File name : shivajayavAdastotram.itx

Category : shiva

Location : doc_shiva

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : February 28, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# शिवजयवादस्तोत्रम्

श्रीगणेशाय नमः ॥

जय जय गिरिजालङ्कृतविग्रह, जय जय विनताखिलदिक्पाद ।
जय जय सर्वविपत्तिविनाशन, जय जय शङ्कर दीनदयाल ॥ १॥

जय जय सकलसुरासुरसेवित, जय जय वाञ्छितदानवितन्द्र ।
जय जय लोकालोकधुरन्धर जय जय नागेश्वर धृतचद्र ॥ २॥

जय जय हिमाचलनिवासिन् जय जय करुणाकल्पितलिङ्ग ।
जय जय संसृतिरचनाशिल्पिन् जय जय भक्तहृदम्बुजभृङ्ग ॥ ३॥

जय जय भोगिफणामणिरञ्जित, जय जय भूतिविभूषितदेह ।
जय जय पितृवनकेलिपरायण, जय जय गौरीविभ्रमगेह ॥ ४॥

जय जय गङ्गातरङ्गलुलितजट, जय जय मङ्गलपूरसमुद्र ।
जय जय बोधविजृम्भणकारण जय जय मानसपूर्तिविनिद्र ॥ ५॥

जय जय दयातरङ्गितलोचन, जय जय चित्रचरित्रपवित्र ।
जय जय शब्दब्रह्मविकाशक जय जय किल्बिषतापधवित्र ॥ ६॥

जय जय तन्त्रनिरूपणतत्पर, जय जय योगविकस्वरधाम ।
जय जय मदनमहाभटभञ्जन, जय जय पूरितपूजककाम ॥ ७॥

जय जय गङ्गाधर विश्वेश्वर, जय जय पतितपवित्रविधान ।
जय जव बम्बन्नाद कृपाकर, जय जय शिव शिव सौख्यनिधान ॥ ८॥

य इमं शिवजयवादमुदारं, पठति सदा शिवधाम्नि ।
तस्य सदाशिवशासनयोगान्माद्यति सम्पन्नाम्नि ॥ ९॥

इति शिवजयवादस्तोत्रं सम्पूर्णम् ॥

शिवगाथा

Proofread by PSA Easwaran

*shivajayavAdastotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*